**पाठ्यक्रमः - Syllabus**

# राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## विद्यावारिधिप्रवेशपरीक्षायाः पाठ्यक्रमः

**बहुविकल्पात्मकाः प्रश्नाः (MCQ) - 50** **पूर्णाङ्काः - 50**

| क्रम.सं | शास्त्रम्/विषयः | पाठ्यक्रमः |
|---|---|---|
| 1. | साहित्यम् | काव्यप्रकाशःआदितःषडुल्लासाः<br>दशरूपकम्-<br>प्रथमद्वितीयतृतीयप्रकाशा एव। |

RVN Sastry
16/3/23

# आदर्शप्रश्नपत्रम्

अत्र प्रश्नपत्रस्य प्रारूपमात्रं प्रदत्तम् । प्रवेशपरीक्षायां भवद्भ्यः प्रदत्तात् पाठ्यक्रमात् एव प्रश्नाः भवेयुः ।

## राष्ट्रियसंस्कृतविश्वविद्यालयःतिरुपतिः

### विद्यावारिधिः

शास्त्रम्/विषयः - साहित्यम्　　　　पूर्णाङ्काः 100

1. मेघदूतकाव्यस्य मल्लिनाथविरचितव्याख्यायाः नाम किम् ?

| | | | |
|---|---|---|---|
| A | जीवातुः | B | बालप्रिया |
| C | सञ्जीवनी | D | घण्टापथः |

2. 'मेघदूते चटुलशफरोद्वर्तनप्रेक्षितानि' इति कस्याः नद्याः विशेषणम्?

| | | | |
|---|---|---|---|
| A | निर्विन्ध्या | B | रेवा |
| C | गम्भीरा | D | सरस्वती |

3. शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली इति केनउक्तम् ?

| | | | |
|---|---|---|---|
| A | दण्डिना | B | मम्मटेन |
| C | विश्वनाथेन | D | भामहेन |

4. बिभत्सरसस्य स्थायीभावः कः?

| | | | |
|---|---|---|---|
| A | भयम् | B | बिभत्सता |
| C | शोकः | D | जुगुप्सा |

5. अनुमितिवादस्य प्रवर्त्तकः कः?

| | | | |
|---|---|---|---|
| A | भरतः | B | भट्टनायकः |
| C | श्रीशङ्कुकः | D | भट्टलोल्लटः |

6. काव्यस्यात्माध्वनिः इति कस्य मतम्?

| | | | |
|---|---|---|---|
| A | मम्मटस्य | B | भामहस्य |
| C | आनन्दवर्द्धनस्य | D | विश्वनाथस्य |

7. कात्याशास्त्रसम्बद्धा अंशाः कस्मिन् पुराणे चर्चिताः?

| | | | |
|---|---|---|---|
| A | अग्निपुराणे | B | वायुपुराणे |
| C | भागवते | D | स्कान्दे |

8. क्वसूर्यप्रभवोवंशः क्वचाल्पविषयामतिः । तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरम् ॥
पद्येऽस्मिन्कः अलङ्कारः?

| | | | |
|---|---|---|---|
| A | उपमा | B | रूपकम् |
| C | अर्थान्तरन्यासः | D | निदर्शना |

9. "पुण्यवन्तोहिदुःखभाजोभवन्ति" वेणीसंहारेचतुर्थे अंके कस्येयमुक्तिः ?

| | | | |
|---|---|---|---|
| A | दुर्योधनस्य | B | कृष्णस्य |
| C | भीमस्य | D | युधिष्ठिरस्य |

Ruseoty 16/3/23

10. 'स्वसिद्धयेपराक्षेपः परार्थंस्वसमर्पणम्' इति का ?

A लक्षणालक्षणा B शुद्धालक्षणा

C उपादानलक्षणा D उपमा

11. अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्त्रः प्रणयन्नुपाधिभिः' इति कुत्र अस्ति?

A रघुवंशे B रसगङ्गाधरे

C रत्नावल्याम् D नैषधीयचरिते

12.अधोनिर्दिष्टानि समुचितक्रमेण योजयित्वा उत्तरक्रमचयनं कुरुत ।

1.समावर्तनम् अ - शूद्रकः

2.मृच्छकटिकम् आ - वी.राघवन्

3.मालतीमाधवम् इ - अम्बिकादत्तव्यासः

4.अनार्कली ई - भवभूतिः

A 1.आ 2.अ 3.ई4.इ B 1.ई. 2.अ 3.आ 4.इ

C 1.अ 2.ई 3.आ4.इ D 1.इ 2.अ 3.ई 4.आ

13. चलापाङ्गां दृष्टिं स्पृशसिबहुशोवेपथुमतीं । रहस्याख्यायीवस्वनसि मृदु कर्णान्तिकचरः । करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरम् । वयं तत्त्वोन्वेषान्मधुकरहतास्त्वं खलु कृती ॥ पद्यमिदं कः वदति?

A नलः दमयन्तीम् उद्दिश्य B दुष्यन्तः शकुन्तलामुद्दिश्य

C दुष्यन्तः भ्रमरमुद्दिश्य D उदयनः भ्रमरमुद्दिश्य

14. वार्द्धक्येमुनीवृत्तीनांयोगेनान्तेतनुत्यजाम्' इति कुत्रअस्ति?

A स्वप्नवासवदत्तनाटके B हर्षचरिते

C काव्यप्रकाशे D रघुवंशे

15. भावकत्वव्यापारेणभाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेनभोगेनभुज्यतेरसः। इति कस्य मतम् ?

A श्रीशङ्कुकस्य B भट्टलोल्लटस्य

C भरतस्य D भट्टनायकस्य

16. यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्म्मलापि कालुष्यमुपयातिबुद्धिः॥ इत्यस्मिन्वाक्येकः अलङ्कारः प्रयुक्तः ?

A रूपकम् B उपमा

C उत्प्रेक्षा D स्वभावोक्तिः

17. वाच्य एववाक्यार्थ इति केषाम् अभिप्रायः ?

A अभिहितान्वयवादिनाम् B अन्विताभिधानवादिनाम्

C मीमांसकानाम् D भाट्टानाम्

Runesh
16/3/23

18. किं संस्कृतप्रायोवाग्व्यापारोनटाश्रयः?

A वीथी B गोष्ठी
C भारती D सात्वती

19. गुणीभूतव्यङ्ग्यस्य कति भेदाः ?

A 9 B 8
C 4 D 2

20. न हिरसादृतेकश्चिदर्थः प्रवर्त्तते – इति कस्य उक्तिः?

A मम्मटस्य B भामहस्य
C विश्वनाथस्य D भरतस्य

21. करुणरसस्यवर्णः कः?

A रक्तवर्णः B श्वेतवर्णः
C कपोतवर्णः D पीतवर्णः

22. अनुमानेऽन्तर्भावंसर्वस्यैवध्वनेः प्रकाशयितुम् इति कुत्र अस्ति ?

A व्यक्तिविवेके B ध्वन्यालोके
C काव्यादर्शे D काव्यालङ्कारे

23. कुमारविजयमहाकाव्यस्य कर्ता कः?

A राधावल्लभत्रिपाठी B रवीन्द्रनाथटागोर
C रेवाप्रसादद्विवेदी D रमाकान्तशुक्लः

24. राकासुधाकरमुखीतरलायताक्षी इति पद्यंकस्यउदाहरणम्?

A रसाभासस्य B भावाभासस्य
C भावोदयस्य D भावसन्धेः

25. वस्तुधर्मः कति विधः?

A त्रिविधः B चतुर्विधः
C दशविधः D द्विविधः

**एवं क्रमेण पाठ्यक्रमानुगुणं 50 प्रश्नाः भवेयुः ।**

******

RNSastry
16/3/23